# RAMAKRISHNA MISSION VIDYAMANDIRA
**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2017**
**THIRD YEAR [BATCH 2015-18]**
**SANSKRIT [Honours]**
**Paper : VI**

Date : 22/12/2017
Time : 11 am – 3 pm
Full Marks : 100

1. अधोदत्तयोः कस्यचन **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]
   a) पाठ्यांशानुसारं रुद्रदेवताचारित्रिकवैशिष्ट्यं प्रतिपादनीयम्।
   b) भूमिसूक्तस्य कस्मिन् वेदेऽन्तर्भावः ? सूक्तेऽस्मिन् प्रतिपादितं भूमेर्माहात्म्यं समुपवर्ण्यताम्।

**OR,**

निम्नोद्धृतानां ययोः कयोश्चिद् **द्वयोः** मन्त्रयोः अनुवादः करणीय आङ्गलभाषया वङ्गभाषया वा। [2×5]
   a) नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
   अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः।।
   b) यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे।
   शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्।।
   c) विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।
   वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु।।
   d) यस्यां पूर्वे पूर्वजना विचक्रिरे
   यस्यां देवा असुरानभ्यवर्तयन्।
   गवामश्वानां वयसश्च विष्ठा।
   भगं वर्चः पृथिवी नो दधातु।।

2. अधोदत्तयोः **एकस्य** प्रश्नस्योत्तरं देयम्। [1×10]
   a) ''...किंस्वित् पुत्रेण विन्दते तन्म आचक्ष्व ...'' – कं जनं प्रति कस्य जनस्यायमनुरोधः ? अनुरुद्धजनेन किमुत्तरं दत्तम् ? [2+8]
   b) भवत्पाठ्यमनुमत्स्यकथानुसारं प्लावनवृत्तान्त उपन्यसनीयः। देशान्तरे एतादृशवृत्तमुपलभ्यते किम् ? [8+2]

**OR,**

अधोदत्तानां यस्य कस्यचिद् अनुच्छेद**द्वय**स्य आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। [2×5]
   a) शश्वद्ध झषऽआस। स हि ज्येष्ठं व्वर्धतेऽथेतिर्भी समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति।
   b) तं होवाचाजनि वै ते पुत्रो यजस्व माऽनेनेति, स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति।
   c) यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि। स यदा तामतिव्वर्धाऽअथ कर्षूं खात्वा तस्यां मां बिभरासि।
   d) तस्य ह दन्ता पेदिरे तं होवाचापत्सत वा अस्य दन्ता यजस्व माऽनेनेति, स होवाच यदा वै पशोर्दन्ताः पुनर्जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति...।

3. अधोदत्तयोः यथेच्छ**मेकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]
   a) पाठ्यांशानुसारं जीवात्मन उत्क्रान्तिप्रक्रिया वर्णनीया।
   b) ''येनाहं नामृता स्यां किमहं तेन कुर्याम्'' इति मैत्रेयीवाक्यं विचार्य याज्ञवल्क्यप्रतिपादितः आत्मलाभोपायः प्रतिपादनीयः।

4. अधोलिखितानां यथेच्छं **द्वयो:** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। [2×6]

a) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः।।

b) ... स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो। न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारम् अरे केन विजानीयाद् इत्युक्तानुशासनाऽसि मैत्रेयि...।

c) तद् यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्पाणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते; पित्र्यं व्य गान्धर्वं वा देवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम्।

d) सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्, स्यां न्वहं तेनामृताहो नेति, नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति।

5. कश्चि**देको** मन्त्रः सप्रसङ्गं व्याख्येयः। [1×8]

a) स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान्शब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः।

b) मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।

6. अधोदत्तयोः **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×12]

a) याज्ञवल्क्यमतानुसारम् ऋणादाननीतयः सम्यक् सविशदमालोचनीयाः।

b) को नाम व्यवहारः ? तस्य कति पादाः, के च ते ? संक्षिप्य तेषामालोचनं कुरुत। [2+2+8]

7. कश्चि**देकः** श्लोकः सप्रसङ्गं व्याख्येयः। [1×7]

a) ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु।
आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते।।

b) साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः।।

8. विषय**द्वय**माश्रित्य टीका विरचनीया। [2×3]

प्राड्विवाकः, साक्षी, प्रतिभूः, निधिः।

9. कस्यचन **एकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

a) स्मृतिशास्त्रेतिहासे रघुनन्दनस्यावदानमवलम्ब्य निबन्धो विरचनीयः।

b) कोटिल्यार्थशास्त्रस्य गुरुत्वं वर्णयत।

10. यत्किमपि विषय**त्रय**मवलम्ब्य टीका विरचनीयाः। [3×5]

जीमूतवाहनः, विज्ञानेश्वरः, शुक्रनीतिः, याज्ञवल्क्यः, नारदसंहिता, हलायुधः।

—————— × ——————